National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 337-339
© 2026 NJHSR
www.sanskritarticle.com

**अशोककुमारषडङ्गी**
शोधकर्त्ता,
व्याकरणविभागणीयछात्रः,
औजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी

**डॉ. पूर्णचन्द्रपाधि**
मार्गदर्शकः:,
रोडर, व्याकरणविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी

**Correspondence:**
**अशोककुमारषडङ्गी**
शोधकर्त्ता,
व्याकरणविभागणीयछात्रः,
औजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी

# प्रातप्रातिशाख्यग्रश्चानां परिचयः

**अशोककुमारषडङ्गी , डॉ. पूर्णचन्द्रपाधि**

**सारांश**

वेदो हि विश्वसाहित्येषु सर्वधाचीनतम पन्थः आसीत्। अतो वेदे भाषायाः पाचीनतमरूपस्य परिज्ञानाय तत् परिशीलनमावश्यकम् प्रतिभाति। स चैकएव वेदा कालक्रमात्। "ऋवेदो गजुर्वेदः, सामवेदोऽथर्ववेद" इति नामभिक्षातुर्विधः मातः। तदनु भाष्यरूपाणां ब्राह्मण चन्यानामाविर्भावो जातः । तत्र च ऋग्वेदस्य इयो ब्राह्मण पन्थाः समुपलभ्यन्ते। तेषां नामानि चैतानि सन्ति।

१. ऐतरेयब्राह्मणम् ।

२. कौषितकिब्राह्मणम् ।

३. सांश्रामनब्राह्मणम् ।

४. शुक्ल यजुर्वेदस्य द्वावेव ब्राह्मषपन्यौ सम्पति निहोते ।

१. माध्वन्दिनशतपथ ब्राह्मणम्।

२. काण्वशतपयब्राह्मणम् ।

कृष्णयजुर्वेदस्य तैतरीयब्राह्मणमेव केवलमस्ति। सामवेदस्यैकादश
ब्राह्मणग्रन्थाः सन्ति।

१. ताण्डवब्राह्मणम् ।

२. बड्विश ब्राह्मणम् ।

३. मां ब्राह्मणम् ।

४. छान्दग्यो ब्राह्मणम् ।

देवता अर्धदेवता।

६. आर्षेयब्राह्मणम् ।

७. सामविधानब्राह्मणम् ।

८. संहितोपनिषद् ब्राह्मणम् ।

९. वंशब्राह्मणम् ।

१०. जैमिनिय ब्राह्मणम् ।

११. जैमिनियोपनिषद् ब्राह्मणम्।

अथर्ववेदस्य गोपथब्राह्मणमिति अधूना उपलब्धम्। पूर्वमन्त्राणां ब्राह्मण-ग्रन्यानांऽश्चाध्यायनमन्तेवासिनः गुरुमुखादेव कुर्वन्तिस्म अतः संहितानामन्तमुच्चारणं पदपाठादि सम्यग्ज्ञानं भवति। कालान्तरे यदा लोकभाषायाः विकाशजातः तदा वैदिक भाषातः प्राय आर्य जनाः दूरीभूताः। एवं स्तितै वर्णस्वरमात्रासन्धिक्छन्दादिविशिष्टनियमाना-माज्ञाने वैदिकमन्त्राणां शुद्धोच्चारणे काठिन्यं संजातम्।

अतस्तत्सौकर्याय प्रातिशाख्यग्रन्थानामाविर्भावोजातः। प्रातिशाख्या-ध्ययनेन वैदिकमन्त्राणामुच्चकरणं तदवर्षस्वर सन्धीनां ज्ञानं च सुलभं भवतीति निश्चयः।

सिद्धे प्रातिशाख्यप्रयोजने प्रातिशाख्यस्वरूपं किमिति जिज्ञासायां तत्र तावत् "शाखां शाखां पति प्रतिशाखाम्" प्रतिशाखासु भवमिति व्युत्पत्या प्रतिशाख्यमितिपदं निष्पद्यते, यस्मिन् ग्रन्थे तत्तद्वेदानामुचारण आदि नियमानामनुशासनं दृश्यते, तदेव "प्रातिशाख्यमिति व्यवह्रियते । शब्दस्तोन महाविधिकोशेषु शाखा शब्दस्यार्थः ग्रन्थांशभेदः वेदैकदेशड संगृहीतः ।

वेदैकदेशस्यायमाशयीयत् संहितानां पयपाठाय तथा स्वरदृष्ट्वा तदुच्चारणाय ऋषिभिस्तदवंशजैस्तच्छिष्यैर्वा रचितो ग्रन्थविशेषः प्रतिशाख्यमिति । तत्र सम्प्रदाय भेदात् पाठभेदस्तदुच्चारणश्चानेकविधं जातम् । अतएव मातिशाख्य ग्रन्यानां वाहुल्यं दृश्यते ।

निरुक्तकारो यास्काचार्यश्च संहितालक्षण प्रसङ्गे पार्षदशब्देन मातिशाख्यस्वरूपमुक्तवान्। तद्यथा "परः सन्निकर्षः संहिता पदप्रकृतीनि सर्वचरणानां पार्षदानी'ति। अर्थात् परः प्रकृष्टः यः सत्रिकर्षः संश्लेषः परस्परं स्वराणां व्यञ्जानां वा सा संहितेत्युच्यते। नवस्त्वन्तरम् । अतः सा पदप्रकृतिः-पदानि प्रकृतीनि यस्याः सा, सर्वचरणानाम् सर्वशाखानां पार्षदानी प्रातिशाख्यमिति व्याख्यातम्। सामान्यतः परिषदि भवमिति व्युत्पत्या पार्षद शब्दः निष्पद्यते। पुराकाले परिषद् निर्माणं कृत्वा विद्वान्सो मिलित्वा ग्रन्थात्रिर्ममुः। अतः प्रातिशाख्यस्य परिषदमिति नामधेयं जातम् ।

मनुस्मृतावपि वेदशास्त्रज्ञानं दशब्राह्मणनां त्रयाणां ब्राह्मणानां वा धार्मिकानुशासनस्य समाधानार्थं धार्मिकपरिषदः अध्यक्षः अस्ति :

**त्रैविधो हेतुकस्तर्की नैरुक्तो धर्मपाठकः ।**
**त्रयश्चाश्रमिणः पूर्वे परिषत्स्माद्वाशावरा ।।**
**ऋक्वेदविद्याजुविच्च सामवेद विदेव च ।**
**त्रयवरा परिशज्ज्ञेया धर्मशंसव निर्णये ।।'**

एवमेव वैदिकपदानां पदपाठनिर्णयार्थः परिषद आसन् । अतएव महाभाष्यकारः पतञ्जलिः पाणिनीयव्याकरणस्य महत्वमुपपादयन् स्पष्टमुदाजहार, यत् - सर्ववेद पारिषदं हीदंशास्त्रम्। तत्र नैकः पन्थाशक्य आस्थानुम्। तत्र कैयटः परिषद इदम् पारिषदम्। साधारणमित्यर्थः। पत्राध्वर्युपरिषदश्चेत्यत्र् । अन्येत्वाहुः परिषदः परिषत्परिच्चारक इत्युच्यते । स च परिषत्साधारण इति परिषदत्वेन साधारणत्वं लक्ष्यते। सर्ववेदाङ्ग्रे त्वादस्य सर्ववेदसाधारणं लक्षणं वहुलादिग्रहणोपेतम्। आनुषङ्गिको लौकिक शब्दसंस्कार इति वेदग्रहणं कृतमिति आह ।

अपिचान्यत्र महाभाष्यकारः पारिषद कृतिरेषा तत्र भवताम् । नैव लोके नान्यस्मिनवेदे अर्धएकारः अर्थ ओकार वास्ति। अत्र नागेशभट्टेन "शास्त्रविशेषाध्यायिनां समवायः परिषद, पर्षद्वा, तत्र भावाकृति-रित्यर्थ" इति परिषद्कृति शब्दो व्याख्यातः । सैव परिषद् प्रातिशाख्य निर्माण प्रमाणमिति निश्चयः । मीमांसकैः कुमारिलभटैश्च "धर्मशास्त्राणां गृह्वाग्रन्थानां च प्रातिशाख्यलक्षणवत् प्रतिचरणं पाठ व्यवस्थोपलभ्यत्" इत्युक्तम् । स तावात् धर्मशास्त्रगृह्मग्रन्थानामपि प्रातिशाख्यवच्चरणव्यवस्था दृश्यते । प्रातिशाख्य-व्यवस्था धर्मशास्त्र सम्वन्धिगृह्मसूत्रेस्वापि चरणरुपेणापि जातेति सिद्धति ।

प्रातिशाख्य स्वरूपविषये अनन्तदेवः कथयति यत् प्रति पञ्चदश शाखायां भिनानि प्रातिशाख्यानि नोपदिष्टानि, किन्तु श्रौत स्मार्तसूत्रवत् प्रातिशाख्यसूत्रमपि पञ्चदशशाखा साधारणं समाम्नतम्। तदित्थं प्रातिशाख्यस्वरूपमिहावगतम् ।

तत्र तावत् -

१. ऋक्मातिशाख्यम् ।

२. तैत्तरीयप्रातिशाख्यम् ।

वाजसनेयिप्रातिशाख्यम् ।

४. मैत्रायणीयप्रातिशाख्यम् ।

५. शामप्रातिशाख्यम् ।

६. अथर्वप्रातिशाख्यम् ।

७. आश्वलायनप्रातिशाख्यम् ।

८. वाष्कलप्रातिशाख्यम् ।

९. शाङ्खायनप्रातिशाख्यम् ।

१०. चारायणीयप्रातिशाख्यम् ।

इत्येतानि दश (१०) प्रातिशाख्यानि परिगणितानि सन्ति। व्याकरणशास्त्रस्ये-तिवृत्तिलेखकः श्रीयुधिष्टिरमीमांसकः कथयति, यत् १. आश्वालायनप्रातिसाख्यम्, २. वाष्कलप्रातिशाख्यम्, ३. सांख्यायनप्रातिशाख्यम्,

४. चारायणीयप्रातिशाख्यम् च इति चत्वारि प्रातिशाख्यानि नोपलभ्यन्ते । एतेषां प्रातिशाख्यानां केचनं अंशा एव यत्र कुत्राऽपि दृश्यन्ते। अतो अनुमियत्ते तेषामपि सत्ता आसीत् ।

एवमन्येपि प्रातिशाख्यसमन्धिग्रन्थाः -

१. अथर्वचतुराध्यायी ।

२. प्रतिज्ञासूत्रम् ।

३. भाषिकसूत्रम् ।

४. ऋक्तन्त्रम् ।

५. लघु ऋक्तन्त्रम् !

६. सामतन्त्रम् ।

७. अक्षरतन्त्रम् ।

८. छन्दोगव्याकरणम् ।

एषु ग्रन्थेष्वापि मन्त्राणामुच्चारणम् संधिविज्ञानं च स्पष्टविवेचित- मस्ति। विषयेऽस्मिन् ऐतिहासिकदृष्ट्या श्रीयुधिष्ठिर मिमांप्लकेन वहुक्त नत्तु

विस्तरभयादप्रकृतत्वात् च इह न उल्लिखते। सत्यकामवर्ममहोदयस्तु-

१. ऋक्यातिशाख्यम् ।

२. तैत्तिरीयप्रातिशाख्यम् ।

३. वाजसनेयिप्रातिशाख्यम् ।

४. मैत्रायणीप्रातिशाख्यम् ।

५. शामप्रातिशाख्यम् ।

६. अधर्वप्रातिशाख्यम् । इति ।

षडेव प्रातिशाख्य ग्रन्थाः समुपलभ्यत्त इति मन्यते ।

एतत् भिनानां आश्वलायनवाष्कलशांख्यायनचारायणी यप्रातिशा- ख्यानां केवलनामान्येव श्रुयतो न किन्तुपलभ्यत्त इति तनिर्णयः।

डॉ. वीरेन्द्र कुमार वर्ममते -

१ ऋक् प्रातिशाख्यम् ।

२. तैत्तरीय प्रातिशाख्यम् ।

३. वाजसनेयि प्रातिशाख्यम्

५ . शैनकीयचतुराध्यायिका।

५. अथर्ववेदप्रातिशाख्यम् ।

६. ऋक्तंत्रम्।

षडेवप्रातिशाख्यग्रन्थाः एव प्रकाशिता प्रसिद्धाश्च।

एवमेव सर्वे इत्तिवृत्त लेखकाः षण्णां प्रातिशाख्यग्रन्थानां समर्थनं कुर्वन्ति। तत्र तेषां प्रातिशाख्यानां समुपलब्धिरेव कारणम्। न त्वेतावन्त एव प्रातिशाख्यग्रन्थाः सन्तीति निश्चयः। येषां प्रकाशनं न जातं येन केनापि रूपेण तन् नामानि श्रूयन्ते एव । अतो गवेषकाः साम्प्रतं तदुलब्धौ प्रयतन्ते । अस्तु !

**शब्द कुंचिका**

प्रतिशाख्यम्, रूक, शम, अथर्ववेद, तैतरिया, बजसनेयी, मैत्रायणी, सौनाकिया चतुराध्यायी, छान्दोग्य ब्याकरणम्, अक्षय तंत्रम, भसिका सूत्रम्, प्रर्तिज्या सूत्रम्,आश्वलायन,

**<u>ग्रन्थसूची</u>**

१. ऋग्वेदप्रातिशाख्यम्, आचार्य शौनकः, डॉ. वीरेन्द्रकुमारवर्मा, काशी हिन्दूविश्वविद्यालय, शोध प्रकाशन १९७० ई.।

२. तैत्तिरीयप्रातिशाख्यम्, श्री वेङ्कटेशर्मा, मद्रपुरीयविश्वविद्यालय, संस्कृत-ग्रन्थावलि, मद्रासः- १९३० ई।

३. वाजसनेयिप्रातिशाख्यम्, आचार्य कात्यायनः, डॉ. वीरेन्द्र कुमार वर्मा, ज्ञानप्रकाश प्रतिष्ठान सी. के. -१/१२ गङ्गामहल, पटनीटोला, वाराणसी १९७५ ई.।

४. अथर्ववेदप्रातिशाख्यम्, डॉ. सूर्यकान्तः, मेहरचन्दलक्ष्मणदास २७३६, कुचाचेला दरियागंज, दिल्ली, ६, १९६८ ई.।

५. ऋक्तन्त्रम्, डॉ. सूर्यकान्तः मेहरचन्दलक्ष्मणदासः २७३६, कुचाचेलां दरियागंज; दिल्ली - ६, १९७८ ई. ।

६. मनुस्मृतिः, आचार्यमनु, पं. गोपालशास्त्रीनेने, चौखम्बा संस्कृत सीरिज ऑफिस, वाराणसी, १९६९ ई. । ई.।

७. प्रतिज्ञापरिशिष्टम्, श्री अनन्तदेवः।

८. निरुक्तम्, श्री यास्काचार्य, पं. भगवद्दत्त, मेहरचन्द्र लक्ष्मणदासः- २७३६, कुचाचेला, दरियागंज, दिल्ली - ६, १९६३ ई०।

९. यजुर्वेद, पं. जगदीश लाल शास्त्री, मोतीलाल बनारसीदास, १९७१ ई. ।

१०. व्याकरणमहाभाष्यम्, महर्षिपतञ्जलिः, श्री गुरुप्रसाद शास्त्री, धरमकूप मीरघाट वाराणसी ।

११. काशिकावृत्तिः, आचार्य जयादित्य वामना विरचितः, स्वामी द्वारिकादासशास्त्री, पं. कालिकाप्रसाद शुक्ल, तारापब्लिकेशन्स, वाराणसी - १९६७ ई.।

१२. प्रौढमनोरमा, श्री भट्टोजिदीक्षितः, श्रीकृष्णमिश्रः, जयकृष्णदास हरिदास -वाराणसी गुप्तः चौखम्बा सं. सीरिज, ऑफिस, बनारस सिटी - १/१९३९ ई. ।

१३. अष्टाध्यायीसूत्रपाठः, महर्षिपाणिनिः, श्रीनारायणमिश्रः, चौखम्बा ओरियन्यलिया, १९८१ ई.।

१४. नन्दिकेश्वरकाशिका, श्रीनन्दिकेश्वरः, चौखम्बा सं. सीरीज ऑफिस वाराणसी - 1966 ई.

१५. वैयाकरणसिद्धान्तकौमुदी-श्रीभट्टोजिदीक्षितः, महामहोपाध्यायः श्री-गिरधरशर्माचतुर्वेदी, मोतीलाल बनारसीदास, १९७९ ई.

१६. वाक्यपदीयम्, श्रीभर्तृहरिः श्रीरामगोविन्दशुक्ल, चौखम्बा संस्कृत सीरीज ऑफिस वाराणसी-१, १९६१ ई. ।

१७. पाणिनीयशिक्षा, महर्षिपाणिनिः, श्रीरुद्रप्रसादः अवस्थी, तदेव १९७२ ई।

१८. धर्मोत्तरपुराण-

१९. बृहद् देवता-महर्षिशौनक, अन्थनीमेक्डोलन, चौखम्बा विश्व- भारती, वाराणसी।